श्री शिव स्तुतिः (अंधक कृतं)

श्री शिव स्तुतिः (अंधक कृतं)

नमोऽस्तुते भैरव भीममूर्ते त्रैलोक्य गोप्त्रेशितशूलपाणे |
कपालपाणे भुजगेशहार त्रिनेत्र मां पाहि विपन्न बुद्धिं || 1 ||

जयस्व सर्वेश्वर विश्वमूर्ते सुरासुरैर्वंदितपादपीठ |
त्रैलोक्य मातर्गुरवे वृषांक भीतश्शरण्यं शरणा गतोस्मि || 2 ||

त्वं नाथ देवाश्शिवमीरयंति सिद्धा हरं स्थाणुममर्षिताश्च |
भीमं च यक्षा मनुजा महेश्वरं भूतानि भूताधिप मुच्चरंति || 3 ||

निशाचरास्तूग्रमुपाचरंति भवेति पुण्याः पितरो नमस्ते |
दासोऽस्मि तुभ्यं हर पाहि मह्यं पापक्षयं मे कुरु लोकनाथ || 4 ||

भवां-स्त्रिदेव-स्त्रियुग-स्त्रिधर्मा त्रिपुष्करश्चासि विभो त्रिनेत्र |
त्रयारुणिस्त्वं श्रुतिरव्ययात्मा पुनीहि मां त्वां शरणं गतोऽस्मि || 5 ||

त्रिणाचिकेत-स्त्रिपदप्रतिष्ठ-ष्षडंगवित् स्त्रीविषयेष्वलुब्धः |
त्रैलोक्यनाथोसि पुनीहि शंभो दासोऽस्मि भीतश्शरणागतस्ते || 6 ||

कृतो महाशंकर तेऽपराधो मया महाभूतपते गिरीश |
कामारिणा निर्जितमानसेन प्रसादये त्वां शिरसा नतोऽस्मि || 7 ||

पापोऽहं पापकर्माऽहं पापात्मा पापसंभवः |
त्राहि मां देवदेवेश सर्वपापहरो भव || 8 ||

मम दैवापराधोस्ति त्वया वै तादृशोप्यहं |
स्पृष्टः पापसमाचारो मां प्रसन्नो भवेश्वर || 9 ||

त्वं कर्ता चैव धाता च जयत्वं च महाजय |
त्वं मंगल्यस्त्वमोंकार-स्त्वमोंकारो व्ययो धृतः || 10 ||

त्वं ब्रह्मसृष्टिकृन्नाथस्त्वं विष्णुस्त्वं महेश्वरः |
त्वमिंद्रस्त्वं वषट्कारो धर्मस्त्वं तु हितोत्तमः || 11 ||

सूक्ष्मस्त्वं व्यक्तरूपस्त्वं त्वमव्यक्तश्चधीवरः |
त्वया सर्वमिदं व्याप्तं जगत् स्थावरजंगमं || 12 ||

त्वमादिरंतो मध्यं च त्वमेव च सहस्रपात् |
विजयस्त्वं सहस्राक्षो चित्तपाख्यो महाभुजः || 13 ||

अनंतस्सर्वगो व्यापी हंसः पुण्याधिकोच्युतः |
गीर्वाणपतिरव्यग्रो रुद्रः पशुपतिश्शिवः || 14 ||

त्रैविद्यस्त्वं जितक्रोधो जितारातिर्जितेंद्रियः |
जयश्च शूलपाणि स्त्वं पाहि मां शरणागतं || 15 ||

इति श्रीवामनपुराणांतर्गत अंधक कृत शिव स्तुतिः |